International Journal of Sanskrit Research 2017; 3(3): 18-21

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(3): 18-21
© 2017 IJSR
www.anantaajournal.com
Received: 06-03-2017
Accepted: 07-04-2017

**Shubh Chandra Jha**
Research Scholer,
SCSVMV University,
Kanchipuram Enathur,
Tamil Nadu, India

**Correspondence**
**Shubh Chandra Jha**
Research Scholer,
SCSVMV University,
Kanchipuram Enathur,
Tamil Nadu, India

# सर्वत्र विभाषा गोः इति सूत्रविचारः

**Shubh Chandra Jha**

## प्रस्तावना

इदमन्धतमं कृत्स्नं जायते भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।

तादृशीभाषायाः संरक्षणाय कानिचन लक्षणानि प्रवृत्तानि तदीयः व्याकरणमिति व्यवहारः।तद्यकरणमपि नैकानि विलसन्ति,तेषु पाणिनीयमद्वितीयम्। द्विविधसंस्कृतस्य लौकिकस्य वैदिकस्य च संस्काराय संरक्षणाय च पाणिनीयम् अद्वितीयम्। व्याकरणेऽस्मिन् षड्विधानिसूत्राणि वर्णनितानि सन्ति तद्यथा-

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।

संज्ञासूत्रम्, परिभाषासूत्रम्, विधिसूत्रम्, अतिदेशसूत्रम्, अधिकारसूत्रम् इमानि षडविधानि सूत्राणि निगदितानि। तेषु षड्विधसूत्रे प्रकृतिवद्भावविधायकम् भवति विधिसूत्रम्।

## सर्वत्र विभाषा गोः

सर्वत्र, विभाषा, गोः इति पदविभागः, त्रिपदात्मकं सूत्रमिदं प्रकृतिभावविधायकं सूत्रम्। सूत्रेस्मिन् एङः पदान्तादति [1] इति सम्पूर्णं सूत्रमनुवर्तते तथा च एङः इति पञ्चम्यन्तं पदं षष्ठ्यन्ततया विपरीणम्य गोः इत्यस्य विशेषणत्वेन तिष्ठति येन विधिस्तदन्तस्य [2] इति नियमात् तथा च पदान्तात् इत्यपि पञ्चम्यन्तं पदं सप्तम्यन्ततया विपरीणम्य पदान्ते इति भूत्वा तिष्ठति। प्रकृत्याऽन्तः पादमव्यपरे [3] इत्यस्मात् सूत्रात् प्रकृत्या इति पदमनुवर्तते यस्यार्थः स्वभावेन निर्विकारस्वरूपेणाऽवतिष्ठते इत्यर्थः(अर्थात् संन्ध्याभावः, यथावदिस्थितीति)। यजुष्युरः [4] इत्यस्मिन् प्रक्रमे पठितत्वात् कदाचित् अस्य सूत्रस्य यजुषि एव प्रवृतिः भवति इति भ्रान्ति न स्यात् अतः सर्वत्र इति पदं सूत्रे पृथक्तया उपात्तं तेन लोके वेदे च इत्यर्थो लभ्यते।

वृत्तिः लोके वेदे च एङन्तस्य गोरति वा प्रकृतिभावः स्यात्पदान्ते। उदाहरणम् - गो अग्रम्। अत्र गवां गोषु वा अग्रम् इत्यस्मिन्नर्थे समासादि कार्ये कृते गो + अग्रम् इत्यवस्थायां प्रकृतसूत्रेण सर्वत्र विभाषा गोः इति सूत्रेण पदान्तस्य एङन्तस्य गोः अति परकत्वात् प्रकृतिभावे गो अग्रम् इत्येव भवति। सूत्रस्यास्य विकल्पत्वात् पक्षे एङः पदान्तादति इति सूत्रेण पूर्वरुपमेकादेशे गोऽग्रम् इति रुपं सिध्यति। ततः अग्रे अवङ् स्फोटायनस्य [5] इति सूत्रेण अवङादेशे, अनेकाल्शित्सर्वस्य [6] इति परिभाषासूत्रेण अनेकालत्वात् सर्वादेशे प्राप्ते, ङिच्च [7] इति परिभाषासूत्रबलात् अनेकालत्वे सत्यपि ङित्वात् अन्तादेशे ग् अवङ् + अग्रम् इति जाते ङकारस्य इत्यंज्ञायां तस्यलोपे अकः सवर्णे दीर्घः [8] इति सूत्रेण अकारयोः सवर्णदीर्घैकादेशे गवाग्रमिति रूपं सिध्यति। सम्भूय अत्र त्रीणि रुपाणि भवन्ति गो अग्रम् , गोऽग्रम, गवाग्रमिति।

अत्र संशयः- प्रकृतसूत्रे एङः पदान्तादति इत्यस्मात् सूत्रात् एङः इति पदंमनुवर्तते तच्च षष्ठ्यन्ततया विपरीणम्य गोः इत्यस्य विशेषणत्वं भवतीत्युक्तं खलु? तन्मास्तु तदनुवर्तनाभावेऽपि गो + अग्रम् इति रूपं सिध्यति खलु। कथमिति चेत् एङः अभावे सूत्रार्थः- लोके वेदे च गोरति वा प्रकृतिभावः स्यात्पदान्ते तदात्वेऽपि अपि गो + अग्रम् इत्यत्र प्रकृत सूत्रेण प्रकृतिभावः भवत्येव अतः एङः इति किमर्थम्।

सः इति विग्रहे अनेकमन्यपदार्थे [9] इत्यनेन बहुव्रीहिसमासे, सुब्लुकि, पुंवद्भावे, ह्रस्वादिकार्ये कृते चित्रगुः इत्यभिष्टं रूपं भवति। ततः चित्रगोः अग्रम् इति विग्रहे समासादिकार्ये कृते, चित्रगु + अग्रम् इत्यवस्थायाम् एकदेशविकृतमनन्यवत् इति परिभाषाबलात् एकदेशे विकृते सत्यपि अनन्यवत् भवति अर्थात् न अन्यवत् भवतीत्यर्थः, तत्र दृष्टान्तः यथा छिन्नेऽपि पुच्छे श्वा श्वैव भवति न तु रासभः जायते। तेनैव प्रकारेण ह्रस्वो नपुंसके प्रातिपदिकस्य [10] इत्यनेन सूत्रेण ओकारस्य ह्रस्वे कृते अप्ययं गो शब्दः एव तेन प्रकृतौ सर्वत्र विभाषा गोः इति सूत्रेण पदान्तस्य गोः अति परे प्रकृतिभावः प्राप्नोति तन्माभूत् अतः सूत्रे एङः इति पदमनुवर्तनीयमेव तदनुवर्तने सति यद्यपि पदान्ते गोशब्दः अस्ति अति परकत्वमपि विद्यते तथापि एङन्तः नास्ति एङन्तत्वाभात् अस्य सूत्रस्य संचारः न भवति तेन एतादृशः संशयः न भवति अतः एङः इति पदमनुवर्तनीयमेवेति।

पुनरत्र संशयः पदान्ते इति किम्?

समाधानम्- यदि सूत्रे पदान्ते इति नोच्यते तर्हि सर्वत्र विभाषा गोः इति सूत्रस्यास्यार्थः इत्थं भविष्यति – लोके वेदे च एङन्तस्य गोरति वा प्रकृतिभावः स्यात्, तेन गो इत्यस्मात् शब्दात् अर्थवदधातुरप्रत्ययः प्रातिपदिकमिति [11] सूत्रेण प्रातिपदिकसंज्ञायां सत्याम् पञ्चमीविभक्तौ षष्ठीविभक्तौ च एकत्वविवक्षायां ङसि, ङस् प्रत्यये, तयोः प्रत्यययोः अनुबन्धलोपे, गो + अस् इति जाते प्रकृतसूत्रेण सर्वत्र विभाषा गोः इत्यनेन प्रकृतिभावः स्यात् तन्निवारणाय पदान्ते इति दलस्य प्रयोजनं वर्तत एव। अन्यथा प्रकृतिभावे सति गोः इति अभिष्टं रूपं न स्यात्।

**पुनरत्र संशयः** – चित्रगो अग्रम् इत्यत्र प्रकृतिभावः कुतो न भवतीति यतो हि चित्रगो अग्रम् इत्यवस्थायां चित्रगो इत्यस्यान्तर्वर्ती सुपा पदान्तत्वं वर्तते, एङन्तत्वमपि वर्तत एव तथा च अति परकत्वमपि वर्तते तर्हि सर्वत्र विभाषा गोः इति सूत्रेण प्रकृतिभावः स्यात् खलु परं न दृश्यते। दृश्यते च पूर्वरूपं तत्कथम्?

**समाधानम्**- वस्तुतस्तु चित्रगो + अग्रम् इत्यवस्थायां सर्वत्र विभाषा गोः इति सूत्रेण प्रकृतिभावे प्राप्ते लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् इत्यनया परिभाषया तस्य निषेधे, एङः पदान्तादति इत्यनेन पूर्वरूपे चित्रगोऽग्रम् इति रूपं सिध्यति। तत्र लाक्षणिकं नाम लक्षणायाः (शास्त्राणाम् , सूत्राणाम्) संचारेण निष्पन्नं रूपं लाक्षणिकं तद्विपरीतं प्रतिपदोक्तं ज्ञातव्यमिति। तथा च परिभाषायाः अर्थः - लाक्षणिकस्य प्रतिपदोक्तस्य च ग्रहणे सम्भवे प्रतिपदोक्तस्यैव ग्रहणं कर्तव्यमिति। प्रकृतौ चित्रगो + अग्रम् इत्यत्र चित्रा गावः यस्य सः इति विग्रहे समासादिकार्ये कृते चित्रगुः इति भवति तस्य सम्बोधने प्रथमाविभक्तौ एकत्वविक्षायां सु प्रत्यये हे चित्रगु + सु इति जाते ह्रस्वस्य गुणः [12] इति सूत्रेण गकारोत्तवर्त्युकारस्य गुणे ओकारे चित्रगो + सु इति जाते

सम्बुद्धिसंज्ञायां सत्याम् एङ् ह्रस्वात्सम्बुद्धे [13] इति सूत्रेण सोर्लोपे हे चित्रगो इति रूपं सिध्यति प्रकृतौ ह्रस्वस्य गुणः इति लक्षणस्य (शास्त्रस्य, सूत्रस्य) संचारेण एङन्तत्वं प्राप्तं भवति न तु प्रतिपदोक्तः एङन्तः गो शब्दः विद्यते तेन प्रतिपदोक्तस्य एङन्तस्य गोशब्दस्य अभावात् न प्रकृतिभावः। तद्भावे एङः पदान्तादति इति सूत्रेण पूर्वरूपे चित्रगोऽग्रमित्यभिष्टं रूपं सिध्यति।

तर्हि इदानीं सूत्रस्यास्य सर्वत्र विभाषा गोः इत्यस्य अर्थः कथम् उपपादनीयश्चेत् – लोके वेदे च प्रतिपदोक्तस्य चैङन्तस्य गोरति वा प्रकृतिभावः स्यात् पदान्ते। एतादृशस्य अर्थस्य सत्वात् चित्रगो अग्रम् इत्यत्र प्रतिपदोक्तेङन्तत्वाभावात न प्रकृतिभावः अपितु पूर्वरूपमेव ।

**पुनरत्र संशयः**- लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् इत्यनया परिभाषया चित्रगो अग्रम् इत्यत्र प्रकृतिभावः वारयितुं न शक्यते यतो हि सा परिभाषा वर्णग्रहणे न प्रवर्तते खलु।

कथमिति चेत् आदेच उपदेशेऽशिति [14] इत्यस्मिन् सूत्रे उपदेशग्रहणमेव अस्या परिभाषायाः वर्णग्रहणे अप्रवृतिं ज्ञापयति। तद्यथा - आदेच उपदेशेऽशिति इत्यस्य सामान्यतः अर्थं कुर्मः- उपदेशे यो एजन्तः तस्य आत्वं स्यात् शिद्भिन्ने प्रत्यये परे तथा सति ग्लै इत्यादिधातूनामात्वं विधीयते। यदि सूत्रे अस्मिन् उपदेशे इति पदं न स्वीक्रियते तर्हि को दोषः इति चेत् उपदेशपदाभावे सूत्रार्थः इत्थं भविष्यति - यो एजन्तः तस्य आत्वं स्यात् शिद्भिन्ने प्रत्यये परे तथा सति गो + भ्याम्, नौ + भ्याम् इत्यादिष्वस्थलेषु आत्वं स्यात् तन्माभूत अतः उपदेशे इति पदमावश्यकमिति तेन प्रातिपदिकानामुपदेशाभावात् न आत्वापत्तिः।

पुनरत्र संशयः- गो + भ्याम्, नौ + भ्याम् इत्यादिस्थले आत्ववारणाय उपदेशे इति पदस्य आवश्यता नास्ति कुत इति चेत् लिटि धातोरनभ्यासस्य [15] इत्यस्मात् सूत्रात् धातोः इति पदमनुवर्तते तदा सूत्रार्थः इत्थं भवति – एजन्तो यो धातुः तस्य आत्वं स्यात् शिद्भिन्ने प्रत्यये। प्रकृतौ गो नौ इत्येतयोः धातुत्वाभावात् न आत्वापत्तिरिति अतः पुनः उपदेशे इति पदं व्यर्थमेव खलु।

इति तेदुच्यते तथा न यदि धातोः इति पदमनुवर्त्य सूत्रार्थः क्रियते तर्हि अचैषीत् , अष्टौषीत् इत्यादिषु दोषापत्तिः कुत इति चेत् चिञ् चये इत्यस्मात् धातोः लुङि, च्लि लुङि [16] इति सूत्रेण च्लि आगमे तस्य च्लेः सिच [17] इति सूत्रेण सिजादेशे लङ्लुङ्लृङ्क्ष्वडुदात्तः [18] इति सूत्रेण अडागमे अनुवन्धलोपे च, अ चि स ति इति जाते इतश्च इति सूत्रेण तकारोत्तरवर्ती इकारस्य लोपे अस्तिसिचोऽपृक्ते [19] इति सूत्रेण ईडागमे , सिचिवृद्धिपरस्मैपदेषु [20] इति सूत्रेण वृद्धौ, आदेशप्रत्यययोः [21] इति सूत्रेण सकारस्य मूर्द्धन्यादेशे अचै + ष् + ई + त् इत्यवस्थायाम् उपदेशपदाभावे आत्वं स्यात् तन्निवारणाय सूत्रे उपदेशे इति पदं निवेशितं प्रकृतौ उपदेशावस्थायां धातुः एजन्तः नास्ति तस्मात् आत्वं न सम्भवति अतः सूत्रे उपदेशे इति पदमावश्यकमिति समाहितम्।

**पुनरत्र संशयः** – उपर्युक्तदोषवारणाय उपदेशे इति पदस्य आवश्यकता नास्ति कुत इति चेत् लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् इति अनया परिभाषया एव उपर्युक्तदोषस्य वारणं सम्भवति यतो हि सिचिवृद्धिपरस्मैपदेषु इति लक्षणस्य संचारेण अत्र एजन्तत्वं प्राप्तं भवति न तु प्रतिपदोक्तः एजन्तः अयं चिञ् धातुः तस्मात् तया लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् इत्यनया परिभाषया एव स च दोषः परिहर्तुं शक्यते तेन पुनः उपदेशे इति पदं व्यर्थं खल्विति।

समाधानम्- सत्यं लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् इत्यनया परिभाषया एव आत्ववारणे सम्भवे उपदेशे इति पृथकतया उपात्तं पदं व्यर्थम्, व्यर्थं सत् ज्ञापयति इयं परिभाषा अनित्या। सामान्यतः अनित्या चेदपि विशेषतः क्व अनित्या इति चेत् वर्णग्रहणे अनित्या इति आयाति। तथा च प्रकृतस्थले वर्णमुपादायैव प्रकृतभावस्य वारणं कृतं भवति तत्कथम्।

इति परिभाषेयं वर्णग्रहणे न प्रवर्तते इति या धीः वर्तते तदसत् कुत इति चेत् यदि वर्णग्रहणे इयं परिभाषा न प्रवर्तेत तर्हि ओत इति सूत्रं भाष्यविरोधः जायेत। ओत् [22] सूत्रं किं कथयति- ओदन्तो निपातः प्रगृह्यः स्यात्। तथा सति अनदः अदःभवति अदोऽभवत्, इत्यत्र अदो + अभवत् इत्यवस्थायां सर्वत्र विभाषा गोः इति सूत्रेण

प्रकृभावः प्राप्नोति तद्वारणाय वार्तिककारेण वार्तिकमप्यारब्धम् ओतश्चि प्रतिषेधो वक्तव्यः परं भाष्यकारेण लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमित्यनया परिभाषया एव प्रकृतिभावं वारयित्वा प्रकृतवार्तिकस्य ओतश्चि प्रतिषेधो वक्तव्य इत्यस्य प्रत्याख्यानं कृतं भवति तथा च एङः पदान्तादति इत्यनेन सूत्रेण पूर्वरूपे अदोऽभवत् इति रूपं सिध्यति । अतः इयं परिभाषा वर्णग्रहणे अपि प्रवर्तत एव। तेन इह हे चित्रगो + अग्रम् इत्यत्रापि अस्याः लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमित्यनया परिभाषया प्रकृतिवद्भावः वार्यते तथा च एङः पदान्तादति इति सूत्रेण पूर्वरूपे कृते चित्रगोऽग्रम् इति रूपं सिध्यति। B

## उपोद्घात

षड्विधसूत्रेषु विधिसूत्रमिदम्। प्रकृतिभावविधायकं सूत्रमस्ति। लोके वेदे च एङन्तस्य गोरति वा प्रकृतिभावः स्यात्पदान्ते इति सूत्रवृत्तिः वर्तते। सूत्रस्य समीक्षात्मकाध्ययनेन सूत्रार्थः इत्थमायाति- लोके वेदे च प्रतिपदोक्तस्य एङन्तस्य गोरति वा प्रकृतिभावः स्यात्पदान्ते। एतादृशः अर्थः लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् इति परिभाषा साहाय्येन लभ्यते। सूत्रे अस्याः परिभाषायाः संचारविषयकं विचारः वर्तते तथा च तस्य वर्णग्रहणे अप्रवृतिविषकं समीक्षणं कृतं भवति तदनु ओत् इति सूत्रमाधारीकृत्य सिद्धान्ते अस्या परिभाषायाः वर्णग्रहणे प्रवृतिं ज्ञापयति। इमे मुख्याः विचाराः कृताः भवन्ति।

## उपयुक्त ग्रन्थ सूची

वैयैकरणसिद्धान्तकौमुदी (वासुदेवदीक्षितप्रणीत बालमनोरमा-व्याख्या, अर्थप्रकाशिकानामक विस्तृत हिन्दी व्याख्या तथा संस्कृतरूपसिद्धि सहित)

प्रौढमनोरमा - महामहोपाध्यायश्रीमद्भट्टोजीदीक्षितविरचिता महामहोपाध्यायभट्टोजीदीक्षित-पौत्र-श्रीहरिदीक्षितकृतो लघुशब्दरत्नश्च। महामहोपाध्यायभैरवमिश्रविरचितरत्नप्रकाशिका, पायगुण्डोपाह्ववैद्यनाथपण्डितकृतभावप्रकाशः, व्याकरणाचार्य पं. गोपालशास्त्रीनेनेकृत सरला, टीकात्रयविभूषितः(अव्ययीभावान्तो भागः) प्रकाशन-

चौखम्भा सस्कृत संस्थान
पोस्ट बाक्स नं. ११३९
के. ३७/११६ गोपाल मन्दिर लेन
वाराणसी २२१००१(भारत)

महाभाष्यम् – चारुदेव शास्त्री
मोतीलाल बनारसीदास
दिल्ली.....पटना
ए- ४४ नारायणा, फेज- १, नई दिल्ली-११० ०२८

## संदर्भ सूची

1. अ. ६.१.१०९ सि. ८६
2. अ. १.१.७२ सि. २६
3. अ. ६.१.११५ सि. ३५१८
4. अ. ६.१.११७ सि. ३५२०
5. अ. ६.१.१२३ सि. ८८
6. अ. १.१५५ सि. ४५
7. अ. १.१५३ सि. ४३
8. अ. ६.१.१०१ सि. ८५
9. अ. २.२.२४ सि. ८३०
10. अ. १.२.४७ सि. ३१८
11. अ. १.२.४५ सि. १७८
12. अ. ७.३.१०८ सि. २४२
13. अ. ६.१.६९ सि. १९३
14. अ. ६.१.४५ सि. २३७०
15. अ. ६.१.८ सि. २१७७
16. अ. ३.१.४३ सि. २२२१
17. अ. ३.१.४४ सि. २२२२
18. अ ६.४.७१
19. अ. ७.३.९६ सि. २२२५
20. अ. ७.२.१ सि. २२९७
21. अ. ८.३.५९ सि. २१२
22. अ १.१.१५ सि. १०४